# Namaramayana

# नामरामायण

## Document Information

Text title : nAmarAmAyaNam

File name : naamaraamaayana.itx

Category : aShTottarashatanAmAvalI, raama

Location : doc_raama

Author : Laxmanacharya

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : P. P. Narayanaswami, Malathi Ravi

Latest update : March 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# नामरामायण

## ॥ बालकाण्डः ॥

शुद्धब्रह्मपरात्पर राम ।
कालात्मकपरमेश्वर राम ।
शेषतल्पसुखनिद्रित राम ।
ब्रह्माद्यमरप्रार्थित राम ।
चण्डकिरणकुलमण्डन राम ।
श्रीमद्दशरथनन्दन राम ।
कौसल्यासुखवर्धन राम ।
विश्वामित्रप्रियधन राम ।
घोरताटकाघातक राम ।
मारीचादिनिपातक राम । १०
कौशिकमखसंरक्षक राम ।
श्रीमदहल्योद्धारक राम ।
गौतममुनिसम्पूजित राम ।
सुरमुनिवरगणसंस्तुत राम ।
नाविकधाविकमृदुपद राम ।
मिथिलापुरजनमोहक राम ।
विदेहमानसरञ्जक राम ।
त्र्यम्बककार्मुखभञ्जक राम ।
सीतार्पितवरमालिक राम ।
कृतवैवाहिककौतुक राम । २०
भार्गवदर्पविनाशक राम ।
श्रीमदयोध्यापालक राम ।
राम राम जय राजा राम ।
राम राम जय सीता राम ।

## ॥ अयोध्याकाण्डः ॥

अगणितगुणगणभूषित राम ।
अवनीतनयाकामित राम ।
राकाचन्द्रसमानन राम ।
पितृवाक्याश्रितकानन राम ।
प्रियगुहविनिवेदितपद राम ।
तत्क्षालितनिजमृदुपद राम ।
भरद्वाजमुखानन्दक राम ।
चित्रकूटाद्रिनिकेतन राम । ३०
दशरथसन्ततचिन्तित राम ।
कैकेयीतनयार्पित राम । (तनयार्थित)
विरचितनिजपितृकर्मक राम ।
भरतार्पितनिजपादुक राम ।
राम राम जय राजा राम ।
राम राम जय सीता राम ।

## ॥ अरण्यकाण्डः ॥

दण्डकावनजनपावन राम ।
दुष्टविराधविनाशन राम ।
शरभङ्गसुतीक्ष्णार्चित राम ।
अगस्त्यानुग्रहवर्दित राम ।
गृध्राधिपसंसेवित राम ।
पञ्चवटीतटसुस्थित राम । ४०
शूर्पणखार्त्तिविधायक राम ।
खरदूषणमुखसूदक राम ।
सीताप्रियहरिणानुग राम ।
मारीचार्तिकृताशुग राम ।
विनष्टसीतान्वेषक राम ।
गृध्राधिपगतिदायक राम ।
शबरीदत्तफलाशन राम ।

कबन्धबाहुच्छेदन राम ।
राम राम जय राजा राम ।
राम राम जय सीता राम ।

## ॥ किष्किन्धाकाण्डः ॥

हनुमत्सेवितनिजपद राम ।
नतसुग्रीवाभीष्टद राम । ५०
गर्वितवालिसंहारक राम ।
वानरदूतप्रेषक राम ।
हितकरलक्ष्मणसंयुत राम ।
राम राम जय राजा राम ।
राम राम जय सीता राम ।

## ॥ सुन्दरकाण्डः ॥

कपिवरसन्ततसंस्मृत राम ।
तद्गतिविघ्नध्वंसक राम ।
सीताप्राणाधारक राम ।
दुष्टदशाननदूषित राम ।
शिष्टहनूमद्भूषित राम ।
सीतावेदितकाकावन राम ।
कृतचूडामणिदर्शन राम । ६०
कपिवरवचनाश्वासित राम ।
राम राम जय राजा राम ।
राम राम जय सीता राम ।

## ॥ युद्धकाण्डः ॥

रावणनिधनप्रस्थित राम ।
वानरसैन्यसमावृत राम ।
शोषितशरदीशार्त्तित राम ।
विभीष्णाभयदायक राम ।

पर्वतसेतुनिबन्धक राम ।
कुम्भकर्णशिरश्छेदक राम ।
राक्षससङ्घविमर्धक राम ।
अहिमहिरावणचारण राम ।
संहृतदशमुखरावण राम । ७०
विधिभवमुखसुरसंस्तुत राम ।
खस्थितदशरथवीक्षित राम ।
सीतादर्शनमोदित राम ।
अभिषिक्तविभीषणनुत राम । (नत)
पुष्पकयानारोहण राम ।
भरद्वाजादिनिषेवण राम ।
भरतप्राणप्रियकर राम ।
साकेतपुरीभूषण राम ।
सकलस्वीयसमानत राम ।
रत्नलसत्पीठास्थित राम । ८०
पट्टाभिषेकालंकृत राम ।
पार्थिवकुलसम्मानित राम ।
विभीषणार्पितरङ्गक राम ।
कीशकुलानुग्रहकर राम ।
सकलजीवसंरक्षक राम ।
समस्तलोकोद्धारक राम । (लोकाधारक)
राम राम जय राजा राम ।
राम राम जय सीता राम ।

## ॥ उत्तरकाण्डः ॥

आगत मुनिगण संस्तुत राम ।
विश्रुतदशकण्ठोद्भव राम ।
सीतालिङ्गननिर्वृत राम ।
नीतिसुरक्षितजनपद राम । ९०
विपिनत्याजितजनकज राम ।
कारितलवणासुरवध राम ।

स्वर्गतशम्बुक संस्तुत राम ।
स्वतनयकुशलवनन्दित राम ।
अश्वमेधक्रतुदीक्षित राम ।
कालावेदितसुरपद राम ।
आयोध्यकजनमुक्तित राम ।
विधिमुखविभुदानन्दक राम ।
तेजोमयनिजरूपक राम ।
संसृतिबन्धविमोचक राम । १००
धर्मस्थापनतत्पर राम ।
भक्तिपरायणमुक्तिद राम ।
सर्वचराचरपालक राम ।
सर्वभवामयवारक राम ।
वैकुण्ठालयसंस्थित राम ।
नित्यनन्दपदस्थित राम ।
राम राम जय राजा राम ।
राम राम जय सीता राम । १०८

इति श्रीलक्ष्मणाचार्यविरचितं नामरामायणं सम्पूर्णम् ।

Encoded and proofread by P. P. Narayanaswami

*Namaramayana*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*